International Journal of Sanskrit Research 2021; 7(4): 213-215

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(4): 213-215
© 2021 IJSR
www.anantaajournal.com
Received: 03-05-2021
Accepted: 06-06-2021

**डॉ. गौतम शरण त्रिपाठी**
ग्राम– खजुहान, पो0– टरवाँ परसा,
थाना– रसूलपुर, जिला– छपरा,
सारण, बिहार, भारत

**Corresponding Author:**
**डॉ. गौतम शरण त्रिपाठी**
ग्राम– खजुहान, पो0– टरवाँ परसा,
थाना– रसूलपुर, जिला– छपरा,
सारण, बिहार, भारत

# ज्योतिषस्य व्यापकता–विमर्शः

**डॉ. गौतम शरण त्रिपाठी**

**प्रस्तावना**

यद्यपि वेद–वेदांकाले कृत–त्रेता–द्वापर–कलि प्रभृति शब्दानां प्रयोगो विद्यते। किन्तु ते शब्दाः युगार्थे अप्रयुक्ता सन्ति। कथञ्चित् तुष्यन्तु दुर्जनन्यायेन तेषां शब्दानां दर्शनात् ते युगवाचका एवेति दुराग्रहे सति भवतु नाम ते युगवाचकाः किन्तु तेषां युगवाचकशब्दानां परिमाण निर्देशस्तु नास्ति एव। पञ्चवत्सरात्मक युगव्यवस्थाऽपि पक्षस्वीकारे सर्वेषां युगानां पञ्चवत्सरात्मक परिमाण एव स्यात्। विंशतिवर्षपरिमिते चत्वारो युगाः परिकल्पिता स्युः, तन्नेष्टम् अतः स्मृतिकाले तेषां युगानां स्पष्टरूपेण मन्वादिनां परिमाणं निर्दिष्टं। तत्तु परिमाणं तु वैदिकसाहित्यस्यपरिमाणात् कल्पनाहीत परमितमधिक इत्येतावनमात्र कालात्यये युग परिमाणे महदन्तरं प्रमाणयति यत् वैदिकसाहित्ये कथित युगशब्दो न कृतादिपरः। किञ्च तेषु चतुर्युगेषु स्मृतिग्रन्थेषु भिन्न कर्म व्यवस्था व्यवस्थापिताऽस्ति। वैदिकस्वीकारे तु पञ्चवर्षान्तराणो भिन्न कर्मव्यवस्था नोपयुक्ताः। अतः एतेषां युगानां स्मृति ग्रन्थोक्तकाल परिमाणमेव विरोधस्तु मान्यम्। वैदिककालपरिमाण कृतादि परिमाणात् रिक्तपरिमाणं मत्वा एव परिहार्यम्। तत्तत्युगे तु कर्मव्यवस्था व्यवस्थापनं तु मनुस्मृतिश्लोकेन विद्यते। तद्यथा–

ब्रह्मास्य तुक्षपाहस्य यत्प्रमाणं समासतः।
द्वापरे यज्ञमेवाहुदनिमेकं कलौयुगे।।[1]

इत्यन्तं अस्य विषये स्पष्ट चर्चा। याज्ञवल्क्य स्मृतौ नवग्रहाणांस्पष्टोल्लेखः।

सूर्यः सोमो महीपुत्रः सोमपुत्रो वृहस्पतिः।
शुक्रः शनैश्चरो राहुः केतुश्चेते ग्रहास्मृताः।।[2]

चन्द्रादीना शुभनक्षत्रयोगे यत्कर्तव्यं ग्रहाणां दुर्दृष्टौ यत्नेन तत्पूजनं इत्यादि निर्देशः– याज्ञवल्केन कृतः। आदिकाव्ये वाल्मीकिरामायणे दिननामानि, नक्षत्रनामानि, षोडशसंस्कारव्यवस्था, शुभाशुभ शकुन विचारादयः स्थले स्थलेषु लक्ष्यन्ते रामादिनं जन्मकाले मिथिलातः उद्वाहान्ते अयोध्यागमन काले श्रीरामचन्द्रस्य वनगमनान्ते, श्री भरतस्य मातुः गृहतः अयोध्यागमन काले, अशोकवाटिकायां श्रीसीतादेव्याः निवासकाले त्रिजटायाः स्वप्ननिदर्शने अन्यस्मिन् स्थले प्राचुर्येण शुभाशुभलक्षण निर्देशपुरस्सरं फलकथनं विद्यते।
महाभारते अपि ज्यौतिषविषयी चर्चा प्राचूर्येण दृष्टिपथमुपैति। युद्धकाले विभिन्ननक्षत्राणां पार्श्वे विभिन्नग्रहाणां स्थितिवर्णनं ग्रहगतिज्ञानं तत्कालीनां गतिः सिद्धयति। तत्र ग्रहगतौ मार्गी गतिवर्णनं वक्रीगति वर्णनञ्च ग्रहाणां गतौ सूक्ष्मज्ञानं निर्दिशति। ते ग्रहास्तु: सूर्यादयः निर्दिष्टाः सन्ति।

ग्रहण संकेतोऽपि महाभारतेऽस्ति तत्र अशुभकरत्वे तस्य ग्रहणं अस्ति। अन्यापि बह्व्योः वार्ताः यस्य संकेत वाल्मीकि रामायणेऽस्ति महाभारतेऽपि वर्तते। यद्यपि महाभारते द्वादशराशीनां सप्तदिनानां नावग्रहपूर्वकं परिज्ञानं नास्ति तथापि श्रीमदवाल्मीकिरामायणे दिनराशि प्रभृतिनां स्थले–स्थले नामग्रहपूर्वक चर्चा सत्वात् रामायणस्य च वेदोत्तर महाभारतकालात् किञ्चित् अंशस्य सत्तात्वात् अपरस्थ च तत्कालत्वात् आपातः महाभारत कालेऽपि अस्य कृत्स्नविषयस्य सम्यग् ज्ञानमासीत् इति वक्तुं शक्यते।

वेदवेदां स्मृतिमहाभारतोत्तरकालान्तरं पञ्चशतख्रिष्टाब्दात् षोडशशतख्रिष्टाब्दं यावत् ज्योतिषशास्त्रस्य स्वर्णिमयुग कथने न संकोचः। अस्मिन् महति कालक्रमेण आर्यभटः, लल्लः, वराहमिहिरः, कल्याणवर्म्मा, ब्रह्मगुप्तः, मुञ्जालः, उत्पलः, श्रीधराचार्यः, पद्मनाभमिश्रः, श्रीपतिः, भोजराजः, ब्रह्मदेवः, शतानन्दः, भास्करः, बल्लालसेनः, इत्यनेके विद्वांसो बभूवुः। यैः सिद्धान्तसंहिता, होरा, अंकगणित, बीजगणित, रेखागणित, जातकग्रन्थः, मुहूर्तग्रन्थः, सामुद्रिकरमलम्, यंत्रनिर्माणविधिः, तै ग्रहवेध निरीक्षणप्रकारः शकुंनप्रश्नादिविचारः, भूशोधन, दिक्शोधन, शल्योद्धार, गृहोपकरणः, इष्टिकाद्वारम्, गेहारम्भ, गृहप्रवेश, उल्कापात, अतिवृष्टि, अल्पवृष्टि, उदयास्तं, ग्रहणफलं इत्यनेकेविषया प्रतिपादिताः। तत्र अद्यावधि पर्यन्तं आधुनिककाले ज्योतिषमिति गणनाभवति। कालेऽस्मिन् केशवार्कः, कालिदासः, महादेवः, नृसिंह दैवज्ञः, महेन्द्रसुरिः, महादेवः, गंगाधरः, मकरन्दः, केशवः, लक्ष्मीदासः, ज्ञानराजः, गणेशः, अनन्तदैवज्ञः, विष्णुदैवज्ञः, सूर्यः, नीलकण्ठः, ढुण्डिराजः, कृष्णदैवज्ञः, रामदैवज्ञः, रंगनाथ, गणेशः, नृसिंह दैवज्ञः, मुनीश्वरः, दिवाकरः, कमलाकरः, लक्ष्मीपतिः, बबुआ ज्यौतिषी, बालकृष्ण ज्यौतिषी दुर्गाशंकर पाठकः, सेवारामशर्म्मा, देवकृष्णशर्म्मा, नृसिंहदेवशास्त्री वा वापूदेवशास्त्री, नीलाम्बर शर्म्मा, महामहोपाध्यायपण्डितसुधाकरद्विवेदी प्रभृतयः इत्यनेके विद्वांसः अभवन्। परिमणाक्तिरिक्तमपि बहवो विद्वांसः आसन्। येषा मेधाशक्त्या ज्यौतिषेतिसमृद्धोऽभवत्।

आधुनिककालीना विद्वांसः अनुवादसरणी विशेषेणावलम्बिता। तत्र पश्चात्य आंग्लज्यौतिषस्य अनुवादं कृत्वा ज्योतिषस्य वैज्ञानिकदृष्ट्या अध्ययन– सरणीं प्रारब्धवन्तः। अनेकस्मिन् स्थले वेधशालां निर्मायियित्वा तस्योपरिवेधग्रन्थञ्च लिखित्वा अस्य शास्त्रस्य महन्महत्त्वं प्रकटिता। अद्यावधि वेदांस्य नेत्रस्थाने प्रतिष्ठितस्यास्यशास्त्रस्य ये समृद्धिकाराः वभूवुः। तेषामिति वृत्तं विदुषां समक्षे प्रायः तिरोहिता एव आसन्। महामहोपाध्यायपदविभूषिता आधुनिकगणकशिरोमण्यः पण्डितश्रीसुधाकरद्विवेदी महाभागाः पूर्वापरक्रमेण ज्यौतिषशास्त्र अध्ययन– अध्यापने क्लेशं बुद्ध्वा अतीतकरूणाया महता परिश्रमेण गणकतरंणियाख्यं गणकानाम् इति–वृत्तिरूपं प्रकटी कुर्वन्। ज्योतिषशास्त्र सम्बर्द्धनाय दीर्घवृत्तलक्षणं, भाभ्रमरेखानिरूपणं, वास्तवचन्द्र शृङ्गोन्नतिसाधनं, ग्रहणेद्वाद्यछादक निर्णयः, यंत्रराजः, प्रतिभाबोधकम्, धराभ्रमः, पिण्डप्रकाशः, समीकरणमीमांसा, दिंमीमांसा, द्युचरचारः, इत्यनेकान् मौलिकग्रन्थान् रचयामासुः। अतः एतेषां महाभागानम् इतिवृत्त समेषां समक्षे स्थापनं कर्तव्यमिति मत्वा श्रीविश्वनाथझारखण्डी प्रणीत भारतीय ज्यौतिष, डा0 वाचस्पतिगैरोला प्रणीत संस्कृतसाहित्येतिहासः, डा0 नेमिचन्द्र ज्यौतिषाचार्यप्रणीत भारतीयज्यौतिष तथा डा0 गोरखप्रसाद प्रणीत भारतीय ज्यौतिष एवं आचार्य पं0 बलदेवउपाध्याय प्रणीत काशी की पाण्डित्य परम्पर प्रभृतिग्रन्थेषु एतेषां, महाभागानां विषये विस्तृत चर्चा कृता स्यात्।

ज्योतियशास्त्रस्येतिहासे महामहोपाध्यायस्य पण्डित श्रीसुधाकर द्विवेदिनो नाम सिद्धान्तज्योतिषस्य उन्नायकेषु गृह्यन्ते। अस्य शास्त्रस्य लुप्तग्रन्थान् प्रकटी कृत्वा तेषां उपत्तिं व्याख्यां भाष्यादीन् सुलभकरणे यदुत्साहं चमत्कारिकज्ञानञ्चप्रकटयामास तत् विद्वद्जनानां आश्चर्य विषयः। हिन्दी साहित्येऽपि अस्य महाभागस्य श्लाघ्यतमोयोगः। मौलिकग्रन्थातिरिक्तं अनेकानां ग्रन्थानां वैज्ञानिकदृष्टया महत्वोत्कर्षसमवलितसम्पादनं कृतम्। अनेकानां ग्रन्थानां सारल्येन विषयावागमाय विविधसरलाटीकामपि लिखिताः।

पञ्चसिद्धान्तिका, सिद्धान्ततवविवेक, शिष्यधीवृद्धि, करणकुतुहलम्, लीलावती, ग्रहलाघवम्, त्रिशिका, करणप्रकाशः, बीजगणितम्, सिद्धान्तशिरोमणि, सूर्यसिद्धान्तः, सुधावषिणीटीका, सौरवासना, इत्यादययाःटीकाग्रन्थाः। वराहमिहिरकृत बृहत्संहिता, ब्रह्मस्फुटसिद्धान्तादयोऽस्य सम्पादित ग्रन्थाः मौलिकग्रन्थेषु चलन–कलन, चलराशिकनम्, औगणितस्येतिहासः। एतदतिरिक्त वेदां ज्योतिषोपरि सरलभाष्यमपि विद्यते।

श्रीसुधाकरद्विवेदी महाभागाः क्लिष्ट कल्पना मग्ना गणितादि शुष्क शास्त्रोत्थापक एव नासन्। अपितु सरसहृदयपूर्णाः कविताकामिनी ललनाललाम बिम्बाधरसुधापूरिताः तासां कविता सुन्दरीणां श्रृंगारालंकारकरणेऽपि दक्षा आसन्। एषां कवित्वप्रतिभा कीदृशी वैदग्धपूर्णा इति निम्नलिखित उदाहरणे ज्ञातुं शक्यते –

चलराशिकलने आरम्भे –

यल्लीला विमला विलोक्य विपुल प्रालेय बालालये।
भूपालेन्द्र ललाट लालन कलालेपाङ्कित क्षमातले।।
उल्लङ्ध्य स्वकुलानि कुलकलितां लज्जानदींमैथिलीं।
यल्लोकाऽऽकुलिता चचाल चलवद्रामाय तस्मै नमः।। [3]

सूर्यसिद्धान्तग्रन्थे स्व टीकान्ते

सरयाकिल देवगिरामया विलिखितां निखिलार्कं कलाकृतिम्।
बहुविधां परिचिन्त्यमतान्तरैः निजकृतिर्गतिविदि्भरिहादृता।। [4]

ग्रहलाघवे टीकान्ते –

इति सुधाकर निर्मितवासना सकलयालया कलयासना।
खचर मध्यगतो परया गता भवलयाऽऽवलया वलयाऽऽसना।। [5]

स्ववृहद्संहिता टीकारम्भे–

जयति सहितशेषोऽशेषलीला विशेषो,
जनक वचनधीरः सत्यसंकल्प वीरः।
सकल निज–जनानां शर्मदः सज्जनाना
दशरथ नृपवाल कोशलेन्द्रो नृपालः।।[6]

इत्थं भारतीयसाहित्याकाशे गणकमण्डलीनां शिरोमौली भूतोऽयं सुधाकरः सर्वदा सुधाकर इव रराज राजते च। अयं बहुमुखी प्रतिभा सम्पन्नः गणकानां प्रसां प्रेरक आदर्शः भास्कराचार्य प्रतिमूर्तिः शतां विदुषाञ्चहृदयश्चासीत्। एतादृश विद्वद्वरेण्यं लब्ध्वादयं भारतीया धन्याः जनको च धन्यतमाः। सत्यमुक्तमस्य महाभागास्य कृतेकश्चनाह –

विज्ञानवीथी पथिकैरूपास्यः सिद्धान्तसिंहासनसार्वभौमः।
प्राचीप्रतीची गणितज्ञवन्द्यः सुधाकरोऽमहनीयकीर्तिः।।[7]

पुरा भारतवर्षे विकसितेषु विविधविज्ञानशास्त्रेष्वन्यतमम् 'ज्योतिषशास्त्रम्' अस्य स्वरूपं बहुविस्तृतं स्यात्। प्राच्यभारतीयाया ज्योतिषस्य वैज्ञानिकपद्धतेस्तावदिदं वैशिष्ट्यं यद् यत्राधुनिकी पाश्चात्यविज्ञानपद्धत्तिः स्वीयासु सर्वासु शाखासु बहुमूल्यानि यत्रोपकरणानि, विशालाः प्रयोगशालाश्चाश्रित्य महर्ती जटिलतां दुःसाध्यताञ्चावहन्ती तिष्ठति, तत्रैव प्राच्यभारतीया विज्ञानपद्धत्तिः स्वीयासु सर्वास्वेव विज्ञानशाखासु ईश्वरकृतां सृष्टिमेव प्रयोगशास्त्रां विधाय निसर्गोपपादितानि सर्वसुलभानि सर्वसुगमानि च यन्त्रोपकरणान्याश्रित्य सर्वसाधारण साध्याविलसति। उदाहरणार्थं सर्वविदितं चिकित्साशास्त्रमेव तावद् द्रष्टव्यम्। आधुनिक पाश्चात्यपद्धत्या चिकित्साशास्त्रं सम्यगधीत्यापि पाश्चात्यपद्धतिकश्चिकित्सको रोगाणां निदानाय स्टेशोस्कोप–एक्सरे–प्रभृतीनि यन्त्राण्यपेक्षते। इत्थं गृहीतविद्योऽपि पाश्चात्य पद्धतिकश्चिकिर्सकोलक्षमुद्रा – मूल्यैर्यन्त्रैर्विना स्वीयं चिकित्साकार्यं सम्यक् सम्पादयितुं न शक्नोति। परं प्राच्यभारतीयपद्धतिकश्चिकित्सकस्तु नाडीविज्ञानसाहाय्येन किमपि मन्त्रमनपेक्ष्यैव रोगनिदानं सम्यगनुतिष्ठति। पाश्चात्यविज्ञानपद्धतेर्बहुमूल्योपकरणसाध्यत्वादेव साम्प्रतममेरिकादेशे रूसदेशे च यादृशी वैज्ञानिकी प्रगतिर्जाता यादृश्यश्च विज्ञानचमत्कृतयस्तैः कृताः, तथा स्वल्पसाधनसम्पन्नैरितरदेशैः कर्तुं न शक्यते।

ज्योतिषस्य स्वरूपविषयस्य वैशिष्ट्यमत्र प्रस्तोष्यमाणायां प्राच्यभारतीयायामृतुविज्ञानपद्धतावपि विद्यते। तद्यथा –

पाश्चात्यायामृतुविज्ञान पद्धतौ वायुदिक्सूचक (विन्डवेन) वायुगतिमापक (ऐनमोमीटर) तापमापक (थर्मामीटर) आर्द्रतामापक (हाइग्रोमीटर) वायुभारमापक (बैरोमीटर) प्रभृतीनां यन्त्राणां साहाय्यमपेक्ष्यते, तथा यन्त्रोपकरणादीनां बहुव्यय साध्यायाः प्रयोगशालाया वा आवश्यकता नास्ति।

पञ्चांसाहाय्येन ग्रहनक्षत्रादीनामुदयास्तस्थितिगतिसङ्क्रान्तियोगादीनां तिथिविशेषनक्षत्रवासरादीनाञ्च ज्ञानं विधाय भाविवृष्ट्यादीनां सामान्यं ज्ञानं वर्षेभ्यः प्रागेवोपलब्धुं शक्यते। तद्यथा आगामिवत्सरविशेषे सामान्या वृष्टिरिति वृष्टिरनावृष्टिरकालवृष्टिर्वा भविष्यतीति। आकाशलक्षणानां पर्यवेक्षणाच्च वृष्टिगर्भाणां स्थितिं ज्ञात्वा वत्सरारम्भात् प्रागेव वत्सरस्य तत्तद्दिवसविशेषे कालविशेषे च भाविन्या वृष्टेः सुनिश्चितं ज्ञानं भवति।
अतः सर्वमेतद् दृष्टिगतं विधाय ज्योतिषस्य स्वरूपस्य प्रयोगपर्यवेक्षणात्मकं कार्यं नूनमारमणीयम्। मन्ये विषयोऽयमनुसंहितो विकसितश्च प्राच्यानां गभीराया वैज्ञानिकविचारपद्धतेः रहस्यमुद्घाटयन् ज्योतिषस्य परिचयः लोकस्य महते कल्याणाय कल्प्यते।

**संदर्भ सूची**


1. मनुस्मृति ।
2. यजुर्वेद 295 इति क्रमेणास्ति।
3. चलराशिकलनम् ।
4. सूर्यसिद्धान्तम् ।
5. ग्रहलग्घनम् ।
6. बृहदसंहितायाम् ।
7. ज्योतिषशास्त्रम।